# षष्ठः पाठः

# दिवास्वप्नः

[प्रस्तुत पाठ में पञ्चतन्त्र की एक प्रसिद्ध कथा का पद्य रूपान्तर दिया गया है । इसमें यह कहा गया है कि जो व्यक्ति वर्तमान को छोड़कर दूर भविष्यत् की असम्भव कल्पना करता है अर्थात् दिवास्वप्न देखता है, उसकी दुर्गति होती है । वह उपहास का पात्र बनता है । स्वभावकृपण नामक एक भिक्षुक ब्राह्मण ने ऐसी ही असम्भव कल्पना की तथा हास्यास्पद बन गया । इसमें सन्देश है कि हम वर्तमान से धीरे-धीरे आगे बढ़ें । एक ही साथ चिन्तन की शृंखला न बना लें । आगे बढ़ना हो तो उद्यम करें, कल्पना लोक में न रहें । अंग्रेजी में कहावत है– Look far, but not too far.]



वर्तमानं परित्यज्य सल्लोकं व्यावहारिकम् ।
ये जनाः कल्पनालोके रमन्ते ते न पण्डिताः ॥ 1 ॥

स्वभावकृपणो विप्रो भिक्षयार्जितसक्तुभिः ।

जीवनं पालयन्नासीत्कदाचिच्चिन्तने रतः ॥ 2 ॥

सक्तुभिः परिपूर्णोऽयं घटः सम्प्रति विद्यते ।

यदा दुर्भिक्षमायाति मूल्यमेषां भवेद् बहु ॥ 3 ॥

सक्तूनां विक्रयेणाहं रूप्यकाणां शतं लभे ।

तेन क्रेष्याम्यहं नूनमजाद्वयमिहात्मनः ॥ 4 ॥

षाण्मासिकात्प्रसवतः ताभ्यां यूथं भविष्यति ।

तद्विक्रयेण क्रमशः प्रभूतं गोधनं भवेत् ॥ 5 ॥

गोभिर्महिष्यः ताभिश्च वडवानां क्रयो भवेत् ।

प्रसवैर्वडवानां मे नूनमश्वाः भवन्ति हि ॥ 6 ॥

अश्वविक्रयणात् स्वर्णं प्रभूतं मे भविष्यति ।

स्वर्णसत्त्वे चतुःशालं भवनं स्यादसंशयम् ॥ 7 ॥

ततो विवाहो नूनं मे रूपवत्या भवेत्खलु ।

विवाहे सति समये बालको जायते मम ॥ 8 ॥

यदा स पञ्चवर्षीयः मत्सकाशं गमिष्यति ।

व्यस्तोऽहं भिन्नकार्येषु रुष्टः शय्यासमुत्थितः ॥ 9 ॥

इत्थं चिन्तयतस्तस्य सम्भ्रमेण घटो हतः ।

सक्तवो भूमिसाज्जाता भग्ना सर्वापि कल्पना ॥ 10 ॥

यथा मूर्खस्य विप्रस्य कल्पना हानिकारिणी ।

तथाचापि दिवास्वप्नमसंभाव्यं न कल्पयेत् ॥ 11 ॥

**शब्दार्था :**

| | | |
|---|---|---|
| परित्यज्य | = | छोड़कर |
| सल्लोकम् | = | वास्तविक जगत् |
| रमन्ते | = | प्रसन्न होते हैं, मग्न रहते हैं |
| स्वभावकृपणः | = | स्वभाव से कंजूस |
| विप्रः | = | ब्राह्मण |
| भिक्षयार्जितसक्तुभिः | = | भिक्षा से प्राप्त सत्तू से |
| कदाचित् | = | कभी |
| रतः | = | लगा हुआ, मग्न |
| घटः | = | घड़ा |
| सम्प्रति | = | इस समय |
| विद्यते | = | है |

| | | |
|---|---|---|
| यदा | = | जब |
| दुर्भिक्षमायाति (दुर्भिक्षम् + आयाति) | = | अकाल आयेगा |
| भवेत् | = | होगा |
| बहु | = | अधिक |
| एषाम् | = | इनका |
| विक्रयेण | = | बेचने से |
| शतम् | = | सौ |
| लभे | = | पाऊँगा |
| क्रेष्यामि | = | खरीदूँगा, क्रय करूँगा |
| नूनम् | = | निश्चय ही |
| अजाद्वयम् | = | दो बकरियाँ |
| इह | = | यहाँ |
| षाण्मासिकात्प्रसवतः | = | छह-छह महीने के बाद प्रसव से |
| यूथम् | = | झुंड (बकरियाँ) |
| प्रभूतम् | = | बहुत ही |
| गोधनम् | = | [illegible] रूपी धन |

| | | |
|---|---|---|
| गोभिर्महिष्य: | = | गायों से भैंसें |
| वडवानाम् | = | घोड़ियों का |
| अश्वविक्रयणात् | = | घोड़ों के बेचने से |
| स्वर्णसत्त्वे | = | सोना रहने पर |
| चतु:शालम् | = | घर का आँगन जिसके सभी ओर कमरे हों |
| भवनम् | = | भवन |
| असंशयम् | = | बिना सन्देह के, निश्चय ही |
| तत: | = | तब |
| रूपवत्या | = | रूपवती स्त्री से |
| जायते | = | उत्पन्न होगा |
| मत्सकाशम् | = | मेरे समीप |
| शय्यासमुत्थित: | = | बिछावन से उठकर |
| इत्थम् | = | इस प्रकार |
| सम्भ्रमेण | = | घबराहट से |
| भूमिसाज्जाता: | = | पृथ्वी पर गिर गये |
| भग्ना | = | टूट गयी |

सर्वापि = सभी

अद्यापि = आज भी

असंभाव्यम् = नहीं होने वाला

कल्पयेत् = कल्पना करें

## सन्धिविच्छेदः/पदविच्छेदः

सल्लोकम् = सत् + लोकम् (व्यञ्जनसन्धिः)

भिक्षयार्जितसक्तुभिः = भिक्षया + अर्जितसक्तुभिः (दीर्घसन्धिः)

पालयन्नासीत्कदाचिच्चिन्तने = पालयन्+आसीत्, कदाचित्+चिन्तने

(व्यञ्जनसन्धिः)

परिपूर्णोऽयम् = परिपूर्णः + अयम् (विसर्गसन्धिः, पूर्वरूप)

दुर्भिक्षम् = दुः + भिक्षम् (विसर्गसन्धिः)

क्रेष्याम्यहम् = क्रेष्यामि + अहम् (यण्सन्धिः)

गोभिर्महिष्यः = गोभिः + महिष्यः (विसर्गसन्धिः)

ताभिश्च = ताभिः + च (विसर्गसन्धिः)

प्रसवैर्वडवानाम् = प्रसवैः + वडवानाम् (विसर्गसन्धिः)

भवेत्खलु = भवेत् + खलु

व्यस्तोऽहम् = व्यस्तः + अहम् (विसर्गसन्धिः)

भूमिसाज्जाता = भूमिसात् + जाता (व्यञ्जनसन्धिः)

तथाद्यापि = तथा + अद्य + अपि (दीर्घसन्धिः)

## प्रकृति – प्रत्यय – विभागः

परित्यज्य = परि + √त्यज् + ल्यप्

पालयन् = √पाल् + णिच् + शतृ

रतः = √रम् + क्त, पुं०

आयाति = आ + √या , लट्लकारः, प्रथमपुरुषः, एकवचनम्

क्रेष्यामि = √क्री , लृट्लकारः, उत्तमपुरुषः, एकवचनम्

भविष्यति = √भू , लृट्लकारः, प्रथमपुरुषः,एकवचनम्

भग्ना = √भञ्ज् + क्त + टाप् (स्त्री०)

हतः = √हन् + क्त, पुं०

भवन्ति = √भू , लट्लकारः, प्रथमपुरुषः, बहुवचनम्

## अभ्यासः

### मौखिकः

1. निम्नलिखितपदानाम् उच्चारणं कुरुत–

सल्लोकम्, पालयन्नासीत्कदाचिच्चिन्तने, नूनमजाड्यमिहात्मनः, षाण्मासिकात्प्रसवतः, गोभिर्महिष्यः, ताभिश्च, अश्वविक्रयणात्, शय्यासमुत्थितः ।

2. अधोलिखितानां पदानाम् अर्थं वदत–

दुर्भिक्षम्, अद्यापि, सम्प्रति, प्रभूतम्, रतः, सल्लोकम्, विप्रः, क्रेष्यामि, शतम्, वडवानाम् ।

3. निम्नलिखितानां पदानां पाठं कुरुत–

गम् + शतृ = गच्छत्, गच्छन्, गच्छन्ती

भू + शतृ = भवत्, भवन्, भवन्ती

दृश् + शतृ = पश्यत्, पश्यन्, पश्यन्ती

हस् + शतृ = हसत्, हसन्, हसन्ती

पठ् + शतृ = पठत्, पठन्, पठन्ती

### लिखितः

1. समुचितविभक्तिप्रयोगेण रिक्तस्थानानि पूरयत–

यथा–सः कलमेन लिखति । (कलम)

6. सन्धिं सन्धि–विच्छेदं वा कुरुत–

(क) परिपूर्णोऽयम् = ______ + ______ ।

(ख) ______ = दुः + भिक्षम् ।

(ग) ताभिश्च = ______ + ______

(घ) सल्लोकम् = ______ + ______

(ङ) ______ = भूमिसात् + जाता ।

(च) ______ = क्रेष्यामि + अहम् ।

## योग्यताविस्तारः

संस्कृत वाङ्मय में नीतिकथाओं की लम्बी परम्परा रही है जिसका आरम्भ विष्णुशर्मा के पञ्चतन्त्र से प्राप्त होता है । विष्णुशर्मा ने राजा अमरशक्ति के मूर्ख पुत्रों को कुशल राजनीतिज्ञ बनाने के लिए कथासंग्रह के रूप में पञ्चतन्त्र की रचना की थी । वर्तमान पञ्चतन्त्र अपने मूल से बहुत दूर हो चुका है । मूल ग्रन्थ के रूपान्तर विभिन्न विदेशी भाषाओं में पहले ही हो चुके थे तथा मूल की प्राप्ति नहीं होती । वर्तमान पञ्चतन्त्र की रचना किसी जैन कथाकार ने ग्यारहवीं शताब्दी ई. में की थी । इसमें पाँच तन्त्र (खण्ड) मिलते हैं – मित्रभेद, मित्रसम्प्राप्ति, काकोलूकीय, लब्धप्रणाश तथा अपरीक्षितकारक । प्रत्येक खण्ड में एक मुख्य कथा तथा अनेक अवान्तर कथाएँ हैं । बीच–बीच में अनेक नीतिपरक तथा संक्षिप्तार्थक श्लोक दिये गये हैं । कुल 70 कथाएँ तथा 900 श्लोक इसमें मिलते हैं । मूल पञ्चतन्त्र का पहला अनुवाद चौथी शताब्दी ई. में ईरान की पहलवी भाषा में हुआ था । इसी

(क) पण्डिता: ........ न रमन्ते । (कल्पनालोक)

(ख) अहम् ........क्रेष्यामि । (अजाद्वय)

(ग) अयं घट: ........ परिपूर्ण: अस्ति ।(सक्तु)

(घ) मम विवाह: ........ भवेत् । (रूपवती)

(ङ) अहं ........ व्यस्त: अस्मि ।(कार्य)

2. वाक्यानि रचयत–

(क) अहम् ........ ।

(ख) बालक: ........ ।

(ग) विद्यते ........ ।

(घ) घट: ........ ।

(ङ) गोधनम् ........ ।

(च) विप्र: ........ ।

3. पाठानुसारेण कोष्ठात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत–

(क) श्व: ........ पुस्तकं क्रेष्यामि । (त्वम्/अहम्)

(ख) ........ जनस्य कल्पना हानिकारिणी भवति । (चतुरस्य/मूर्खस्य)

(ग) विप्रस्य घट: ........ परिपूर्ण: आसीत् । (सक्तुभि:, जलै:)

(घ) विप्रः ________ आसीत् । (भिक्षुकः/धनिकः)

(ङ) सक्तूनां विक्रयेणाहं रूप्यकाणां ________ लभे । (शतम्/पञ्चशतम्)

(च) विप्रस्य सम्भ्रमेण घटः ________ अभवत् । (भग्नः/संयुक्तः)

4. पाठानुसारेण एतेषु किं 'सत्यम्' 'असत्यम्' वा लिखत –

(क) पण्डिताः कल्पनालोके रमन्ते । ( )

(ख) मूर्खाः कल्पनालोके रमन्ते । ( )

(ग) विप्रः स्वभावकृपणः आसीत् । ( )

(घ) विप्रः उदारचरितः आसीत् । ( )

(ङ) घटः सक्तुभिः परिपूर्णः आसीत् । ( )

(च) दिवास्वप्नः असंभाव्यो भवति । ( )

5. संस्कृतभाषायाम् एकपदेन उत्तराणि लिखत –

(क) स्वभावकृपणः कः आसीत् ?

(ख) सक्तुभिः परिपूर्णः कः आसीत् ?

(ग) अश्वविक्रयणात् प्रभूतं किं भविष्यति ?

(घ) मूर्खस्य कल्पना कीदृशी भवति ?

(ङ) कः असंभाव्यः भवति ?

के आधार पर अरबी, तुर्की, लैटिन आदि पश्चिमी भाषाओं में यह रूपान्तरित हुआ था। दुर्भाग्य की बात है कि मूल पञ्चतन्त्र के साथ पहलवी अनुवाद भी नष्ट हो गया।

अपरीक्षितकारक में ऐसी कथाएँ संकलित हैं जो बिना बिचारे हुए काम करने के परिणामों को दिखाती हैं। पाठक को इनसे मनोरंजन होता है किन्तु जीवन की शिक्षा भी मिलती है। प्रस्तुत पाठ इसी खण्ड से "सोमशर्मपिता" की कथा का ही नवीन पद्यरूपान्तर है।

◆◆◆